No. २३८९
क

Title छाग बलि विधानम्

Author

Extent २० पत्र Age

Subject तन्त्र

छागबलिविधान

नं० १२८९

5849

नं. ~~१६८~~ ३४१

नं० १३८९ क

ष्टागमाष्टविधानि

२० पत्राणि

नकलि

F

Corrupt



अथछागवलिविधानम् ततःवह्निरेवपशुंस्नापयित्वा ने
१ त्रवंधपूर्वकंमंडपमध्येसमानीय ॐमेध्याकारस्तंभमध्ये
पशुंवंधवंधय ॐवरुणपाशेनपशुंवंधयवंधय इतिपि
प्पलादिवृक्षोद्भवयज्ञपूजेपट्टडोरादिपशुंवंधयेत् ॐछा
गपशवेनमः इतिपादयोः पाद्यंनमः एवंअर्घ्यंस्वाहा ए
षोर्घ्यः इदमाचमनीयंस्वाहा मुखे इदंस्नानीयंसर्वांगे ॐ
वाराहीयमुनागंगाकरतोयासरस्वती कावेरीचंद्रभागाद्य

सिंधुभैरवमागराः अजस्नानेमहेशानि सान्निध्यमिहकल्प
य ॐछागपशवेनमः इदंस्नानीयं ॐछागछागपशवेनमः
एषगंधः इतिस्कंधयोः ॐछागपशवेनमः एतेऽक्षताः ॐ
छागपशवेनमः एतानिपुष्पाणिवौषट् एषधूपः अयंदी
पः इदंनैवेद्यं छागपशवेनमः रं एतदधिपतये अग्नये
नमः इतिपशुपृष्ठेपुष्पंदद्यात् मूलं एतत्संप्रदानरूपायै
सांगोपांगायै सायुधायै सवाहनायै सपरिवारायै अमुक

देवतासहित अमुकदेव्यैपुष्पांनमः इतिदेव्यैपुष्पांजलिंद।
२ द्यात् ततोवामहस्तंछागस्कंधेधृत्वा दक्षहस्तेनकृपाणादिना
ॐह्लींपशुहूंफट्स्वाहा इतिपाशुपतास्त्रेणत्रिधासंप्रोक्ष्य
ॐवाक्तआप्यायतां ॐमनस्तआप्यायतां ॐचक्षुस्तआप्या
यतां ॐरसनातआप्यायतां ॐमेढ्रंतआप्यायतां ॐपुच्छंत
आप्यायतां ॐशृंगेतआप्यायेतां ॐरोमाणितआप्यायंतां
ॐवाचंतेशुंधामि ॐमनस्तेशुंधामि ॐरसनांतेशुंधामि ॐ

ध्राणं ते सुं धामि ॐ प्राणं ते सुं धामि ॐ हस्तौ ते सुं धामि ॐ पादौ ते सुं धामि ॐ मेढ्रं ते सुं धामि ॐ मांसं ते सुं धामि ॐ पायु ते सुं धामि ॐ रुधिरं ते सुं धामि ॐ मज्जां ते सुं धामि ॐ नाडीस्ते सुं धामि ॐ चक्राणि ते सुं धामि ॐ रोमाणि ते सुं धामि ॐ सर्वांगानि ते सुं धामि ॐ अग्निः पशुरासीत्तेनायजंत स एतं लोकमयजद्यस्मिन्नग्निः स ते लोको भविष्यति तं जेष्यसि पिबैता अपः ॐ सूर्यः पशुरासीत्तेनायजंत स एतं लोकमयजद्यस्मिन्सूर्यः

सतेलोकोभविष्यतितंजेष्यसिपिवैतारायः ॐविस्नुःपस्तुरासी
२ तेनायजंतसतएतल्लोकमयजद्यस्मिन्विस्नुःसतेलोकोभविष्य
3 तितंजेष्यसिपिवैतारायः ॐरुद्रःपस्तुरासीतेनायजंतएतं
ल्लोकमयजद्यस्मिन्रुद्रःसतेलोकोभविष्यति तंजेष्यसिपि
वैतारायः ॐसद्योजातंप्रपद्यामिसद्योजातायवैनमः भवे
भवेनातिभवेभवस्वमांभवोद्भवायनमः ॐवामदेवायन
मोज्येष्ठायनमः श्रेष्ठायनमोरुद्रायनमः कालायनमः

कालविकरणायनमः बलायनमोबलविकरणायनमः ब
लप्रमथनायनमः सर्वभूतदमनायनमोमनोन्मनायनमः
ॐअघोरेभ्योथघोरेभ्योघोरघोरतरेभ्यः सर्वेभ्यः सर्वशर्वेभ्यो
नमस्तेस्तुरुद्ररूपेभ्यः ॐतत्पुरुषायविद्महे महादेवायधी
महि तन्नोरुद्रः प्रचोदयात् ॐईशानः सर्वविद्यानामीश्वरः
सर्वभूतानांब्रह्माधिपतिर्ब्रह्मणोधिपतिर्ब्रह्माशिवोमेस्तुस
दाशिवों ॐहंसः शुचिषद्वसुरंतरिक्षसद्धोतावेदिषद तिथिर्दु

रोणसन्नृषद्वरसद्व्योम सदब्जागोजाऋतजाअद्रिजाऋतंबृह।
८ त् ॐप्रतद्विष्णुस्तवतेवीर्य्येणमृगोनभीमः कुचरोगिरिष्ठा
५ यस्योरुषुत्रिषुविक्रमणेष्वधिक्षियंतिभुवनानिविश्वा ॐत्र्यं
बकंयजामहेसुगंधिंपुष्टिवर्द्धनं उर्वारुकमिवबंधनान्मृ।
त्योर्मुक्षीयमामृतात् ॐतद्विष्णोःपरमंपदꣳसदापश्यंति
सूरयः दिवीवचक्षुराततं तद्विप्रासोविपण्यवोजागृवासः
समिंधतेविष्णोर्यत्परमंपदं ॐविष्णुर्योनिंकल्पयतुत्वष्टा

हूपाणिपिंशत्तुआसिंचतु प्रजापतिर्धाताागर्भंदधातुते ग
र्भंदेहिसिनीवालिगर्भंदेहिसरस्वति गर्भंदेस्त्वश्विनौदेवावा
धत्तांपुष्करस्त्रजौ ॐआपोहिष्ठामयोभुवस्तानऊर्ज्जेदधा
तुनः महेरणायचक्षसेयोवःशिवतमोरसः तस्यभाज
यतेहनः उशतीरिवमातरः तस्माअरंगमामवो यस्यक्ष
यायजिन्वथ आपोजनयथाचनः ॐवरुणस्योत्तंभनम
सिवरुणस्यस्कंभसर्जनीस्थोवरुणस्यऋतसदन्यसिवरुण

वरुणाक्रतसदनमासीद इतिसंप्रोक्ष्य मूलंसांगांसावर।
५ णांसायुधांसवाहनांसपरिवारांअमुकदेवतासहितांअमुक
5 देवीत्वांजुष्टंप्रोक्षामि इतिप्रोक्षणं अथांगपूजाश्रोत्रयोः
ॐदिशेनमः त्वचि ॐवातायनमः चक्षुषोः ॐसूर्य्यायन
मः घ्राणयोः ॐअश्विनीकुमाराभ्यांनमः वाचि ॐअग्नये
नमः मुखे ॐसरस्वत्यैनमः कंठे ॐमहालक्ष्म्यैनमः हस्त
योः ॐइंद्रायनमः पादयोः ॐउपेंद्रायनमः पायौ ॐमि

त्रायनमः उपस्थे ॐप्रजापतयेनमः शिरसि ॐचामुंडा
येनमः स्कंधे ॐभद्रकाल्यैनमः पृष्ठे ॐगंधर्वायेनमःस्कं
पुच्छे ॐवीरभद्रायनमः वृषणायोः ॐवाराहैनमः उदरे
ॐसप्तसमुद्रेभ्योनमः रुधिरे ॐब्रह्मणेनमः मांसे ॐवि
ष्णवेनमः वसायां ॐरुद्रायनमः चक्षेषु ॐजीवात्मनेनमः
रोमसु ॐऔषधीवनस्पतिभ्योनमः नाडीषु ॐगंगायमु
नाभ्यांनमः सर्वांगेषु ॐमरुद्गणेभ्योनमः इतिपशोरंग

६ 8

पूजा ततः पशोर्दक्षिकर्णे ॐ पशुपाशाय विद्महे पशुरूपा
यधीमहि तन्नो पशुः प्रचोदयात् ॐ हिलि हिलि किलि किलि
पशुरूपधरायै क्लीं दुर्गायै वषट् इति पशुकर्णे वारत्रयं प
ठेत् ॐ नेत्रत्रयाय वौषट् इति नेत्रबंधं मोचयेत् ततः पु
ष्पांजलिं गृहीत्वा ॐ यज्ञार्थे पशवः सृष्टाः यज्ञार्थे पशुघा
तनं अतस्त्वां घातयिष्यामि तस्माद्यज्ञे वधो ऽवधः शिवा
द्भूतमिदं पिंडमतस्त्वां शिवतां गतः आवृष्य से पशो त्वं हिना

शिवस्त्वंशिवोसिहि २ पशुरूपपरित्यज्यत्वंगंधर्वस्वरूपधृ
क् गौरीरूपसमासाद्यममकल्याणदोभवः ३ पशुपाश
विमोक्षायहेहंमकंडस्थितायच पशवेचनमस्तुभ्यंनम
स्तेवलिरूपिणे ४ छेद्योसिवलिरूपस्त्वमाज्ञयापरयागु
रो छेदभेदोद्भवेदुःखंत्वमस्वपशुरूपधृक् ५ इतिबद्धां
जलिंपठेत् ततःसंकल्पः ॐअद्येत्यादिश्रीअमुकदेविप्रीत
येअमुकछागंवह्निदैवतंदत्तयज्ञविनाशिन्यैमहाघोरायैयो

गिनीकोटिपरिवृतायै ह्रीं भद्रकाल्यै मूलं अमुकदेवतासहितअमु
७ कदेविंदशावर्षावछिन्न छागवलित्वेनाहंघातयिष्ये इतिसंक
ल्पः अंगास्फुरणादिकं कारयित्वा ततःखड्गमादायत्रिकोणवृ
त्तचतुरस्त्रात्मकं मंडलोपरिताम्रादिपात्रेसंस्थाप्य खड्गंधृत्वा
ॐ प्रष्टवाहुर्महातेजश्यामश्चारक्तलोचनः भीमदंष्ट्राकरालस्या
लोलजिह्वाभयानकः ॐ खड्गायनमः इतिपाद्यादिभिसंपू
ज्यः मूलेवागीश्वरीब्रह्मभ्यांनमः मध्ये श्रीलक्ष्मीनारायणा

भ्यांनमः ॐ अग्रे ॐ उमामहेश्वराभ्यांनमः इतिसंपूज्यः ॐ
खड्गतीक्ष्णाछिंधिछिंधिकट्टकट्ट इतिखड्गमंत्रंत्रिर्जपित्वा ॐ
असिर्विशसनःखड्गस्तीक्ष्णधारोदुरासदः श्रीगर्भोविजयश्चैव
धर्मपालनमोस्तुते करवालकृपाणत्वंचंडिकायाकरेस्थि
तः पशुरक्तप्रदानेनचामुंडाप्रीतिमावह इतिनमस्कृत्य ॥
खड्गाकारंदक्षिणहस्तेनखड्गमुद्रांदर्शयित्वा खड्गमादाय।
ॐ कालिकालिमहाकालिकालिकेकालरात्रिके छिंधिछिं०

धिपफट्रुधिरं पिबपिब मांसं भक्षयभक्षय स्वौं स्वाहा इतिपशु
८ स्कंधेखड्गंस्पर्शयेत् ततश्छेदकर्त्तुस्तिलकादिकंकृत्वा तस्य
8 हस्तेखड्गंदद्यात् ॐवीरायासुरनाशायशाक्तिकार्यार्थे तत्प
र पशुछेदत्वयाशीघ्रं वीरनाथनमोस्तुते इतिप्रणम्यए
कघातेनपशुंघातयेत् ततः देव्यावामभागेत्रिकोणव
त्चतुरस्रात्मकोपरि छागमुंडंसरक्तंस्थापयित्वा रुधि
रामृतेनदेवींतर्पयेत् मूलं ॐकौशिकीरुधिरेणाप्याय

तां इतित्रिवारंतर्पयित्वा शेषरुधिरंस्थापयित्वा ततःछा
गमुंडंपूजयेत् ॐदिव्यकपालाय
नमः ॐरुधिरवदनायनमः ॐ
सिद्धायनमः ॐसिद्धगात्रायनमः
ॐवीजापुरुषायनमः इतिसंपूज्यः
प्रदीपवर्त्तिकांगृहीत्वा मूलंश्रमुक
देविंश्रमुककपालंगृह्णगृह्णभक्षयभक्षयस्वाहा इतिप्रदी

पवर्त्तिकापशुंशिरसिदद्यात् यावच्छीर्षैकरोमाणिदीपोद
९ हतिभैरव तावद्वर्षसहस्राणिगौरीलोकंसगच्छति इतिस
१ मर्प्य रक्तभागचतुष्टयंकृत्वा ईशाने ॐविदारिकायैनमः
अग्नये ॐपापराक्षस्यैनमः नैरृते ॐपूतनायैनमः वा
योः ॐकौशिक्यैनमः ॐरक्तदंतिकायैस्वाहा इतिसमर्प्य
येत् ततःपुष्पांजलिंगृहीत्वा ॐमहिषघ्निमहामायेचामुं
डेमुंडमालिनी आयुरारोग्यमैश्वर्य्यंदेहिदेविनमोस्तुते ॥

इतिदेव्यैसमर्प्यः कृतयापूजासांगतासिद्ध्ये इमानिदक्षि
णासमर्पयामिनमः इतिछागवलिविधानम् ॥ ःः ॥

१

१०

10